विद्युद्दूतः

vidyud-dūtaḥ

क्रमाङ्कः अष्टमः

वसुधैव कुटुम्बकम्
INTERNATIONAL ASSOCIATION OF SANSKRIT STUDIES
अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

Issue: Eighth

१/१/२०१४

1/1/2014

*प्राक्तनभारतवर्षे संस्कृतेन लौकिको व्यवहारः*

भगवता पाणिनिना साधुशब्दानां व्युत्पादनार्थं शब्दानुशासननामकं शास्त्रं विरचितम् । तदुक्तं महाभाष्यपस्पशायाम् अथ शब्दानुशासनमिति शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमिति । शब्दानुशासनमिति व्याकरणस्यान्वर्था सञ्ज्ञा शब्द इति च साधुपर्यायः । तथा शब्दानुशासनमिति साधुशब्दानुशासनमित्यनन्यार्थम् । शब्दा हि द्विविधाः साधवोऽसाधवश्चेति । पाणिनीयव्याकरणे साधवः शब्दा असाधुभ्यो विविक्ताः प्रकृतिप्रत्ययादिविभागेन ज्ञाप्यन्ते । एषामपि शब्दानां द्वैविध्यं लौकिकवैदिकभेदेन । तथोक्तं केषां शब्दानाम् । लौकिकानां वैदिकानां चेति (पस्पशाह्निके) ।

लौकिका इति लोके विदिताः (लोकसर्वलोकाट्ठञ् [अ० ५।१।४४] इति ठञ्) । अत्र लोके यया वाण्या व्यवह्रियते सा भाषेति व्यपदिश्यते । तद्यथा

प्रथमायाश्च द्विवचने भाषायाम् (अ० ७।२।८८) इति भाषाविषये प्रथमाया द्विवचने युष्मदस्मदोरन्त्यस्याकारादेशो विधीयते युवाम् आवाम् इति । वेदेषु तु युवम् आवम् इत्यपि प्रयोगः ।

क्वसुश्च (अ० ३।२।१०७) इति छन्दसि विषये लिटः क्वस्वादेशं विधाय भाषायां सदवसश्रुवः (अ० ३।२।१०८) इति भाषायां सदादिधातुभ्यः स प्रत्ययो विधीयते ।

अस्या भाषाया संस्कृतमिति व्यपदेशः यथा संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः (काव्यादर्शे १।३३) इति ।

लोकविषयः पृथुर्विविधश्च । तत्र च प्रदेशभेधेन विशिष्टाः प्रयोगाः । तथा ह्यष्टाध्यायामुदगादीनां प्रयोगविशेषा उदाहृताः । तद्यथा

भाषायां प्रायेण मातापितरावित्युच्यते । अत्र च पूर्वपदस्यान्त्यवर्णस्य स्थान आनङङादेशः आनङ ऋतो द्वन्द्वे (अ० ६।३।२५) इति सुत्रेण । उदञ्चस्तु मातरपितराविति प्रयुञ्जते । तदुक्तम् मातरपितरावुदीचाम् (अ० ६।३।३२) इति ।

उदीचां भाषायां मेङधातोर्विनिमयेऽर्थे वर्तमानात् क्त्वा प्रत्ययो दृश्यते यथा अपमित्य याचते इति । अन्यत्र याचित्वापमयते इत्युच्यते । तथा सूत्रितम् उदीचां माङो व्यतीहारे (अ० ३।४।१९) इति ।

निरुक्तकारोऽपि तत्तद्देशनियतप्रयोगाञ्जानाति । शवधातोस्तिङन्तरूपाणि

कम्बोजेष्वेव प्रयुज्यन्ते आर्यास्तु शवमिति कृदन्तं भाषन्ते स्म । एवमेव लवनार्थकस्य दाधातोस्तिङन्तानि पदानि प्राच्येष्वेव भाष्यन्ते आर्येषु तु दात्रमिति कृदन्तं प्रसिद्धिं भजते । तदुक्तं यास्केन शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते ... विकारमस्यार्येषु भाषन्ते शव इति दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु (निरुक्ते २ये अध्याये २ये काण्डे) इति । शब्दप्रयोगविषयस्य महत्त्वं तत्र च केषाञ्चिच्छब्दानां नियतविषयत्वं महाभाष्येऽप्युदितम् — एतस्मिन्नतिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते । तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति । विकार एनमार्या भाषन्ते शव इति । हम्मतिः सुराष्ट्रेसु रंहतिः प्राच्यमध्येषु गमिमेव त्वार्याः प्रयुञ्जते । दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु (पस्पशायाम्) इति ।

देशे देशे प्रयुज्यमानानां भाषाविशेषाणामौदीच्या वाणी श्रेष्ठत्वेन प्रसिद्धा । तदुक्तमृग्वेदब्राह्मणे तस्मादुदीच्यां दिशि प्रज्ञाततरा वागुच्यते । उदञ्च उ एव यन्ति वाचं शिक्षितुम् । यो वा तत आ गच्छति तस्य वा शुश्रूषन्त इति स्माह (कौशीतकीब्राह्मणे ७।७।३६-३९, शाङखायनब्रह्मणे ७।६) इति । सुविदितं चैव भगवान् पाणिनिः शालातुरीय इति ।

अन्यच्च ।अष्टाध्याय्यां पाणिनेः काले प्रदेशे च ये साधुवक्तारस्ते साक्षादपेक्ष्यन्ते । अत्र हि अन्येभ्यो ऽपि दृश्यते (अ॰ ३।२।७५) अन्येष्वपि दृश्यते (अ॰ ३।२।१०१) अन्येषामपि दृष्यते (अ॰ ६।३।१३७) इत्यादिसूत्रेषु दृश्यते दृश्यन्त इति अन्येभ्य इत्यादि चोक्त्वानिर्धारितविषयाणि कार्याणि विधीयन्ते । नहि सूत्रत एव ज्ञायते एभ्योऽन्येभ्यो धातुभ्यो विज्मनिन्क्वनिब्वनिपः प्रत्ययाः प्रयुज्यन्ते एष्वन्येषूपपदेषु जनेर्डो भवति एषां वान्येषां पदानां दीर्घत्वमिति । तत्तु प्रयोक्तॄणां प्रयोगादेव शक्यं ज्ञातम् । तदुक्तं वृत्तिकारेण दृशिग्रहणं प्रयोगानुसरणार्थम् (काशिका ३।२।७५) इति अन्येषामपि दीर्घो दृश्यते स शिष्टप्रयोगादनुगन्तव्यः (काशिका ६।३।१३७) इति च ।

तादृशः प्रयोगो लौकिके व्यवहार एव विद्यते । अत्र च गच्छति काले भाषायां विपरिणामा उत्पद्यन्ते । केचिच्छब्दा निवर्तन्ते अन्ये च तेषां स्थाने तदर्थबोधनाय प्रयोगपथमवतरन्ति । तद्यथा वेदे ऊष चक्र इत्यादयः प्रयोगा विद्यन्ते । पाणिनिनापि परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (अ॰ ३।४।८२) इति लिट्स्थानिन्यास्थविभक्तेर् अ इत्यादेशो विहितः । अतो ज्ञायते तत्काललौकिक्यां भाषायामीदृशानि शब्दरूपाण्यासन्निति । अर्वाक्तु तेषामर्थे उषिताः कृतवन्तः इतयादयो निष्ठान्ताः प्रायुज्यन्त । तदाह वार्त्तिककृत् अप्रयोगः प्रयोगान्यत्वात् (पस्पशायां वा॰ १५) इति भाष्यकारश्च अप्रयोगः खल्वेषां शब्दानां न्याय्यः । कुतः । प्रयोगान्यत्वात् । यदेतेषां शब्दानामर्थे ऽन्यान्शब्दान्प्रयुञ्जते । तद्यथा ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः तेरेत्यस्यार्थे किं यूयं तीर्णाः चक्रेत्यस्यार्थे किं यूयं कृतवन्तः पेचेत्यस्यार्थे किं यूयं पक्ववन्त इति (तत्र भाष्ये) इति ।

ये वक्तार अष्टाध्यायीमनधीत्यापि तत्रानुशिष्टाञ्शब्दाञ्जानन्त्यन्याँश्च शब्दाञ्जानन्ति तान् पतञ्जलिः शिष्टानिति व्यपदिशति । पृषोदरादीनि यथोपदिष्टम् (अ॰ ६।३।१०९) इति सूत्रेण पृषोदरप्रकाराणि शब्दरूपाणि येन प्रकारेणोच्चारितानि तादृशानि साधूनीति प्रतिपाद्यते । तत्र सूत्रे भाष्ये यथा शिष्टैरुच्चारितानीत्युक्तम् । शिष्टाश्चार्यावर्तवासिनो विशिष्टा ब्राह्मणाः । तदुक्तं तत्रैव एतस्मिन्नार्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अग्रह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारगास्तत्रभवन्तः शिष्टा इति । अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं येऽत्र विहिताः शब्दास्तान्प्रयुञ्जानम् । स पश्यति नूनमस्य दैवानुग्रहः स्वभावो वा योऽयं नाष्टाध्यायीमधीते ये चास्यां विहिताः शब्दास्ताँश्च प्रयुङक्ते । नूनमन्यानपि जानातीति चेति ।

पुरातणे भारतवर्षे न केवलं आर्यभाषायाः साधुशब्दानां प्रयोक्तार एव

निवसन्ति स्म । अन्येऽपि तत्र तत्र वास्तव्या आसन् ये साधुशब्दैर्न व्यवाहरन् । तेऽसाधुशब्दान् (अपशब्दान्) प्रायुञ्जत । तैश्च सह ब्राह्मणानामन्येषाञ्च व्यवाहरेण भवितव्यम् स च व्यवहारो न शब्दैरेव समभवत् । अत एवोक्तं भाष्यकारेण यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति (पस्पशायाम्) इति । एवं सत्यर्थबोधनाय शब्दस्यापशब्दस्य च प्रयोगः प्रसक्तः । तत्र चायमेव विशेषः शब्दप्रयोगे पुण्यमिति । तदुक्तं समानायामर्थगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति । एवं क्रियमाणमभ्युदयकारि भवतीति (पस्पशायाम्) इति । अन्यच्च ने केवलं साधुशब्दानां ज्ञाने प्रयोग एव वा धर्मः अपि तु शास्त्रपूर्वके प्रयोगे । तदुक्तं शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन (पस्पशायां वा॰ ११) इति । तथा हि ये शब्दान्प्रयुञ्जते तेषां च साधुत्वं व्याकरणव्युत्पादितत्वेन जानन्ति तेऽभ्युदयेन युज्यन्ते । तदाह एकः पूर्वपरयोः (अ॰ ६।१।८४) इति सूत्रे भाष्यकार एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गो लोके कामधुग्भवतीति ।

कवयोऽपि कदाचिदपशब्दान्प्रयुञ्जते । तद्यथा यू स्त्र्याख्यौ नदी (अ॰ १।४।३) इति सूत्रे भाष्ये यस्मिन्दश सहस्राणि पुत्रे जाते गवां ददौ । ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवति ॥ इति काव्यमुद्धृतं यत्र आतोऽनुपसर्गे कः (अ॰ ३।२।३) इति शास्त्रविरुद्धः कप्रत्ययान्तः प्रियाख्यशब्दः प्रयुक्तः । तस्य छान्दसत्वेन साधुत्वमुपन्यस्तं प्रत्याख्यातं च भाष्यकारेण — छन्दोवत्कवयः कुर्वन्ति । न ह्येषेष्टिरिति । तत्र च कैयटः न ह्येषेति असाधव एवैवमादयः (नदीसूत्रे प्रदीपे) इति । किञ्च ऋषिकल्पा अपि लौकिके व्यवहारेऽपशब्दान्प्रयुञ्जते स्म । श्रूयते हि । केचिदृषयो बभूवुर्ये यद्वा नस्तद्वा न इति वक्तव्ये यर्वाणस्तर्वाण इति वदन्ति । याज्ञे तु कर्मणि नापभाषन्ते । तदुक्तं पस्पशायाम् एवं हि श्रूयते । यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथतथ्याः । ते तत्रभवन्तो यद्वा नस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते । याज्ञे पुनः कर्मणि नापभाषन्त इति ।

एवमेतद्विज्ञेयम् — पुराणे भारतवर्षेऽकृत्रिमा भाषा संस्कृतं नामान्योन्यव्यवहारे प्रायुज्यत ब्राह्मणैरन्यैश्च येऽपशब्दाञ्शब्दाँश्चाजानन्प्रायुञ्जत चेति ।

***जोर्ज् कार्दोना***

---

*वृद्धास्ते हि विचारणीयचरिताः*

मधुकर जोशी इति नामपट्टिकां बिभ्राणः जोशीनिवासः । अत्र मधुतातः तस्य पुत्रः राघवः स्नुषा वैदेही पौत्रश्च श्रीकरः इत्येते चत्वारः निवसन्ति । मधुतातः वयसः अशीतिं प्राप्तः जराजर्जरतनुः । गृहात् बहिः न गच्छति । प्रातः उत्थाय सर्वे स्वं स्वं कर्म अनुष्ठातुं निष्क्रामन्ति सायं च प्रतिनिवर्तन्ते । मधुतातः एकाकी एव गृहे यथाकथञ्चित् आत्मानं विनोदयति । कदाचित् इदम् एकाकित्वम् असोढं भवति । सः केनचित् सम्भाषितुम् इच्छति । एकदा सायं राघवः वैदेही श्रीकरश्च गृहं प्रत्यागच्छन्ति भोजनं समाप्य दूरदर्शनम् अवलोकयन्तश्च अभ्यागतकक्षे उपविशन्ति । तत्र उपस्थाय मधुतातः सर्वान् उद्दिश्य भणति, "अयि भोः सकलं दिनम् अहं मूकः एव गृहे तिष्ठामि । सायं प्रत्यागताः यूयं कुतो न मया सम्भाषध्वे? जानाम्यहं त्रयोऽपि यूयं श्रान्ताः क्लान्ताश्च प्रत्यागच्छत इति । परं केवल पञ्च निमेषान् कुतो न मया सह संवदध्वे?" "पञ्च निमेषाः? तात, निमेषमात्रमपि न लभामहे ।" वदति श्रीकरः । राघवः भण-ति, "तात, Please try to understand, सर्वेऽपि वयं घटीयन्त्रेण यन्त्रिताः । गृहमागताः विश्रमितुम् इच्छामः । अवकाशः एव नास्ति तात, समयो ना-स्ति । हां, यदि भवान् किमपि इच्छति, अवश्यम् अस्मान् वदतु । परं प्रतिदिनं भवता सम्भा-

षितुं मा निर्बध्नातु ।" वैदेही भाषते, "तात, ननु भवत्समीपे जपमाला वर्तते । कुतो न ताम् उच्चैः जपन्तः आवर्तयन्ति । तेन समयोऽपि गच्छति, ईशचिन्तनमपि भवति ।" "तदपि करोमि, वत्से, परं जपमालावर्तनं मम सम्भाषणस्य तृष्णां कथम् उपशामयेत् । आस्तां तावद् ।" इत्युक्त्वा मधुतातः स्वकक्षं निवर्तते ।

अन्येद्युः आरभ्य सः भित्तिलग्नं दिवंगतभार्यायाः छायाचित्रं प्रति मनोगतान् विचारान् प्रकटयन् सम्भाषणेच्छाम् अंशतः पूरयति । तम् एकाकिनं सम्भाषमाणं दृष्ट्वा श्रीकरः पितरौ वदति, "अहो, किम् उन्मत्तो तातः? एकाकी एव सम्भाषते ।" तौ अपि तथा शङ्केते । एकदा अपराह्णे मधुतातः कार्यालये कार्यव्यापृताय राघवाय दूरध्वनिं करोति तस्य शब्दं श्रोतुकामः । राघवः न प्रतिवदति सायं गृहमागतः मधुतातं भर्त्सयन् वदति , "कथं न जानाति भवान् कार्यव्यापृतोऽहं दूरध्वनिं न स्वीकरोमि इति । Please don't disturb me like this." अरे, "sorry, sorry, sorry" वदति मधुतातः । सायं पठनार्थं वृत्तपत्रम् अन्विष्यन्ती वैदेही तत् यदा मधुतातस्य कक्षे लभते तदा क्रोधाविष्टा भणति, "क्षीणे नेत्रे तथापि लोभः वृत्तपत्रपठने । पठित्वा पुनः कुतो न स्वस्थाने स्थापितम्?" अपरेद्युः सायं मधुतातः अभ्यागतकक्षे उपविश्य दूरदर्शनम् अवलोकयति । राघवः आगच्छति कैश्चित् अभ्यागतैः सह । मधुतातं वदति, "तात, इदानीमहम् एतैः सह अत्रोपविश्य वार्तालापं कर्तुम् इच्छामि । अलं दूरदर्शनावलोकनेन ।" मधुतातः तस्य ईप्सिततमायाः दूर्दर्शनमालिकायाः अन्तं द्रष्टुम् इच्छति । अतः तथैवोपविश्य मालिकाम् अवलोकयति । रात्रौ तस्य कक्षं गत्वा राघवः तं निन्दमानः वदति, "कुतो न शृणोति भवान् यन्मया उच्यते । आसीनेषु अतिथिषु किम् उचितं दूरदर्शनावलोकनम्? मधुतातः "क्षम्यताम्" इति उत्तरं ददाति । रविवासरे प्रातः यदा सर्वे गाढं प्रसुप्ताः तदा उत्थाय मधुतातः पाकशालां गत्वा किमपि पात्रं ग्रहीतुम् इच्छति । तत्तस्य हस्तात् पतति महान्तं च शब्दं कुरोति । सर्वे उत्थाय ससम्भ्रमं पाकशालां धावन्ति पश्यन्ति च मधुतातं पात्राणां मध्ये तिष्ठन्तम् । सर्वे आक्रोशन्ते "तात, किमिदं प्रचलति? । कुतो लुडबुडायते भवान् पाकशालायाम् ? । सप्ताहे एकवारमेव प्रातः निद्रां लब्धुकामाः । तदपि न अनुमन्यते भवान् । वर्धते भवतां संरम्भः।" एतदाकर्ण्य कम्पमानः मधुतातः यथाकथञ्चित् आत्मानम् आसन्दे स्थिरीकृत्य वदति ,"अरे, अरे सत्यम् उद्वेजयामि युष्मान् सर्वान् । प्रमादो मे यदहं प्रातः पाकशालां प्रविश्य युष्माकं निद्राभङ्गं कृतवान् । परं किं करोमि ? एकस्मिन्नेव गृहे निवसतां युष्माकं दर्शनमपि दुर्लभं कुतः श्रवणम्? कामं यूयं मया सह वार्तालापं कर्तुं समयं न लभध्वे । परं प्रमाद्यन्तम् उद्वेजयन्तं मां भर्त्सयितुं मुखम् उद्घाटयत । यदि माम् अधिक्षेप्तुं निन्दितुं भवतां समीपे पञ्च निमेषाः विद्यन्ते तर्हि कुतो वार्तालापार्थं न विद्यन्ते? कामं भर्त्सयत माम्, ताडयत माम् अपशब्दैः । पारं गतोऽहम् मानापमानाभ्याम् । अतः अपशब्दानपि सहे । परम् अयि भोः, वदत, यत्किमपि सम्भाषध्वं येन सुसह्यं भवेत् इदम् एकाकित्वम्" इत्युक्त्वा आसन्दात् उत्थाय मधुतातः शनैः शनैः स्वकक्षं निवर्तते ।

इति **सरोजा भाटे**-लिखिताः चरिताः

---

विद्युद्दूतस्य अष्टमाङ्कः समाप्तः

---